# Bhillakritam Nilagrivashiva Stotram

# ભિલ્લકૃતં નીલગ્રીવશિવસ્તોત્રમ્

## Document Information

Text title : Bhillakritam Nilagrivashiva Stotram

File name : shivastotrambhillakRRitaMnIlagrIva.itx

Category : shiva, shivarahasya, stotra

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 19 | 180-188||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2024

*sanskritdocuments.org*

# ભિલ્લકૃતં નીલગ્રીવશિવસ્તોત્રમ્

સર્વવ્યાપી સર્વભૂતાન્તરાત્મા
સાક્ષી વેત્તા નિર્ગુણશ્ચેશ્વરશ્ચ ।
સોમો નિત્યો નિર્વિકારશ્ચિદાત્મા
નીલગ્રીવઃ પાતુ મામાધિદુઃખાત્ ॥ ૧૮૦॥

માયાતીતો મોહિતાશેષલોકઃ
સોમાકારઃ સામવેદસ્વરૂપઃ ।
સર્વાશાસ્યઃ સર્વરૂપો મહેશો
નીલગ્રીવઃ પાતુ મામાધિદુઃખાત્ ॥ ૧૮૧॥

વ્યક્તાવ્યાક્તાનાદિધર્માભિગમ્યો
વ્યક્તાવ્યાક્તાનાદિધર્માભિગભ્યઃ ।
વ્યક્તાવ્યક્તાઽનાદિવેદાભિગમ્યો
નીલગ્રીવઃ પાતુ મામાધિદુઃખાત્ ॥ ૧૮૨॥

યં વેદાન્તા નૈવ જાનન્તિ દેવં
યસ્માન્નિત્યં વેદવાચો નિવૃત્તાઃ ।
યં બ્રહ્માદ્યા નૈવ જાનન્તિ સોઽયં
નીલગ્રીવઃ પાતુ મામાધિદુઃખાત્ ॥ ૧૮૩॥

યત્સવ્યાઙ્ગાદુદ્ભવઃ સૃષ્ટિકર્તુઃ
યદ્વામાઙ્ગાજ્જન્મ સમ્પ્રાપ વિષ્ણુઃ ।
યઃ સર્વેશઃ સોઽયમાદ્યન્તશૂન્યો
નીલગ્રીવઃ પાતુ મામાધિદુઃખાત્ ॥ ૧૮૪॥

યં સર્વેશં તત્ત્વતો વેદનિષ્ઠા
વિજ્ઞાયેશં પૂજયન્ત્યાદરેણ ।
સોઽયં શર્વઃ સર્વવેદાન્તવેદ્યો
નીલગ્રીવઃ પાતુ મામાધિદુઃખાત્ ॥ ૧૮૫॥

યસ્યાપાઙ્ગસ્પન્દમાત્રેણ નિત્યં
બ્રહ્મોપેન્દ્રેન્દ્રાદયઃ કમ્પમાનાઃ ।
દૂરે તિષ્ઠન્ત્યન્વહં સોઽયમીશો
નીલગ્રીવઃ પાતુ મામાધિદુઃખાત્ ॥ ૧૮૬॥

યત્પાદાબ્જં વિષ્ણુરત્યન્તભક્ત્યા
સ્વીયં નેત્રં સમ્યગદુત્ખાય રમ્યમ્ ।
સ્વાભીષ્ટાર્થં પૂજયામાસ સોઽયં
નીલગ્રીવઃ પાતુ મામાધિદુઃખાત્ ॥ ૧૮૭॥

યસ્ય સ્મૃત્યા સર્વપાપૌઘનાશો
યત્પૂજાતો ઘોરસંસારનાશઃ ।
યસ્ય સ્તુત્યા મુક્તિરાપ્તૈવ સોઽયં
નીલગ્રીવઃ પાતુ મામાધિદુઃખાત્ ॥ ૧૮૮॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ભિલ્લકૃતં નીલગ્રીવશિવસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૯ । ૧૮૦-૧૮૮॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 19 . 180-188 ..

Notes:
Bhilla ભિલ્લ eulogizes and worships Nīlagrīva Śiva નીલગ્રીવ શિવ at the Kālahastīśvara kṣetra કાલહસ્તીશ્વર ક્ષેત્ર.
The Chapter 19 has a further description about the Intense Devotion of The Bhilla ભિલ્લ where he tries to protect the Śivaliṅga શિવલિઙ્ગ from damage that might be caused by the stones as the temple falls, by arching himself over the Śivaliṅga શિવલિઙ્ગ instead of running away to protect himself.

Encoded and proofread by Ruma Dewan

---

*Bhillakritam Nilagrivashiva Stotram*

pdf was typeset on April 28, 2024

Please send corrections to *sanskrit@cheerful.com*